CAMBRIDGE INTERNATIONAL EXAMINATIONS

**General Certificate of Education Advanced Level**

**SANSKRIT** **9606/1**

PAPER 1. Prescribed Texts

**MAY/ JUNE 2010**

Additional materials:
Answer paper

**TIME** $2^1/_2$ hours

**INSTRUCTIONS TO CANDIDATES**

Write your name, Centre number and candidate number in the spaces provided on the separate answer paper.

Answer all questions.

Write your answers on the answer paper provided.

If you use more than one sheet of paper, fasten the sheets together.

**INFORMATION FOR CANDIDATES**

The maximum number of marks for each question is shown in brackets [ ] at the end of each question.

**This question paper consists of 9 printed pages.**


© UCLES 2010

**1** *Buddhacarita of Aśvaghoṣa*

**(i)**
अथ कष्टतपः स्पष्टव्यर्थक्लिष्टतनुर्मुनिः ।
भवभीरुरिमां चक्रे बुद्धिं बुद्धत्वकाङ्क्षया ॥
नायं धर्मो विरागाय न बोधाय न मुक्तये ।
जम्बुमूले मया प्राप्तो यस्तदा स विधिर्ध्रुवः ॥
न चासौ दुर्बलेनाप्तुं शक्यमित्यागतादरः ।
शरीरबलवृद्ध्यर्थमिदं भूयोऽन्वचिन्तयत् ॥
क्षुत्पिपासाश्रमक्लान्तः श्रमादस्वस्थमानसः ।
प्राप्नुयान्मनसावाप्यं फलं कथमनिर्वृतः ॥
निर्वृतिः प्राप्यते सम्यक् सततेन्द्रियतर्पणात् ।
संतर्पितेन्द्रियतया मनःस्वास्थ्यमवाप्यते ॥
स्वस्थप्रसन्नमनसः समाधिरुपपद्यते ।
समाधियुक्तचित्तस्य ध्यानयोगः प्रवर्तते ॥
ध्यानप्रवर्तनाद्धर्माः प्राप्यन्ते यैरवाप्यते ।
दुर्लभं शान्तमजरं परं तदमृतं पदम् ॥

*Book 12, vv 100 to 106*

**(a)** Translate lines 1 to 4, *'atha . . . vidhirdhruvaḥ'.* [5]

**(b)** Translate and explain the following:
**(i)** *'svasthaprasannamanasaḥ'* (line 11)
**(ii)** *'dhyānapravartanāt'* (line 13) [3]

**(c)** In your own words, state the understanding that the Buddha comes to as recorded in the passage above. [2]

**(ii)** स्मृत्वा जन्म च मृत्युं च तासु तासूपपत्तिषु।
ततः सत्त्वेषु कारुण्यं चकार करुणात्मकः॥

कृत्वेह स्वजनोत्सर्गं पुनरन्यत्र च क्रियाः।
अत्राणः खलु लोकोऽयं परिभ्रमति चक्रवत्॥

इत्येवं स्मरतस्तस्य बभूव नियतात्मनः।
कदलीगर्भनिःसारः संसार इति निश्चयः॥

द्वितीये त्वागते यामे सोऽद्वितीयपराक्रमः।
दिव्यं लेभे परं चक्षुः सर्वचक्षुष्मतां वरः॥

ततस्तेन स दिव्येन परिशुद्धेन चक्षुषा।
ददर्श निखिलं लोकमादर्श इव निर्मले॥

सत्त्वानां पश्यतस्तस्य निकृष्टोत्कृष्टकर्मणाम्।
प्रच्युतिं चोपपत्तिं च ववृधे करुणात्मता॥

इमे दुष्कृतकर्माणः प्राणिनो यान्ति दुर्गतिम्।
इमेऽन्ये शुभकर्माणः प्रतिष्ठन्ते त्रिपिष्टपे॥

*Book 14, vv 4 to 10*

**(a)** Translate and comment on the following:
**(i)** *'karuṇātmakaḥ'* (line 2)
**(ii)** *'kadalīgarbhaniḥsāraḥ'* (line 6) [3]

**(b)** Translate lines 11 to 14, *'sattvānām . . . tripiṣṭape'.* [4]

**(c)** In his later teachings, what solution did Buddha prescribe as a cure for the suffering he saw? [3]

[Total: 10 x 2 = 20 marks]

**[Turn over**

**2** *Manu*

(i) इन्द्रियाणां विचरतां विषयेष्वपहारिषु ।
संयमे यत्नमातिष्ठेद्विद्वान्यन्तेव वाजिनाम् ॥
एकादशेन्द्रियाण्याहुर्यानि पूर्वे मनीषिणः ।
तानि सम्यक्प्रवक्ष्यामि यथावदनुपूर्वशः ॥
श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं वाक्चैव दशमी स्मृता ॥
बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्वशः ।
कर्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते ॥
एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम् ।
यस्मिञ्जिते जितावेतौ भक्तः पञ्चकौ गणौ ॥

*Book 2, vv 88 to 92*

**(a)** Translate lines 3 to 6, *'ekādaśendriyāṇyāhur . . . smṛtā'.* [4]

**(b)** Translate and describe the following compounds:
**(i)** *'śrotrādīni'* (line 7)
**(ii)** *'svaguṇena'* (line 9) [2]

**(c)** Sum up in your own words the essence of what is taught in these verses. [4]

**(ii)** आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम् ।
आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम् ॥

खं संनिवेशयेत्स्वेषु चेष्टनस्पर्शनेऽनिलम् ।
पक्तिदृष्ट्योः परं तेजः स्नेहेऽपो गां च मूर्तिषु ॥

मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम् ।
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम् ॥

प्रशासितारं सर्वेषामणीयांसमणोरपि ।
रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम् ॥

एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् ।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ॥

एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः ।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ॥

*Book 12, vv 119 to 124*

**(a)** Translate lines 1 to 4, *'ātmaiva . . . mūrtiṣu'.* [5]

**(b)** Translate and categorise the following:
**(i)** *'svapnadhīgamyam'* (line 8)
**(ii)** *'janmavṛddhikṣayaiḥ'* (line 12) [3]

**(c)** Sum up the teaching given by Manu in the above verses. [2]

[Total: 10 x 2 = 20 marks]

**[Turn over**

**3** *Upaniṣads*

**(i)** तस्मै स होवाच। द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च॥

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते॥

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्। नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः॥

*Muṇḍaka Up. 1:1: 4 to 6*

**(a)** Translate lines 1 to 5, *'tasmai sa . . . tadakṣaramadhigamyate'.* [5]

**(b)** Translate and explain:
**(i)** *'apāṇipādam'* (line 6);
**(ii)** *'bhūtayonim'* (line 7) [3]

**(c)** Explain in your own words the difference between what the Upaniṣad calls the lower knowledge and the higher knowledge. [2]

**(ii)** सलिल एको द्रष्टाद्वैतो भवति एष ब्रह्मलोकः सम्राडिति हैनमनुशशास याज्ञवल्क्यः एषास्य परमा गतिः, एषास्य परमा सम्पत्, एषोऽस्य परमो लोकः, एषोऽस्य परम आनन्दः, एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥

स यो मनुष्याणां राद्धः समृद्धो भवति, अन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः, सम्पन्नतमः, स मनुष्याणां परम आनन्दः अथ ये शतं मनुष्याणामानन्दाः स एकः पितृणां जितलोकानामानन्दः अथ ये शतं पितृणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दः अथ ये शतं गन्धर्वलोक आनन्दाः स एकः कर्मदेवानामानन्दः ये कर्मणा देवत्वमभिसम्पद्यन्ते अथ ये शतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दः यश्च श्रोत्रियोऽवृजिनोऽकामहतः ॥

*Bṛhadāraṇyaka Up. 4:3: 32 and 33*

**(a)** Translate lines 1 to 4, *'salila eko . . . upajīvanti'.* [4]

**(b)** Translate and explain:
**(i)** *'gandharvalokaḥ'* (line 9)
**(ii)** *'akāmahataḥ'* (line 12) [3]

**(c)** This passage and its continuation explains a series of levels of bliss. List these levels. Who is it that attains the highest bliss of all? [3]

[Total: 10 x 2 = 20 marks]

**[Turn over**

**4** *Bhagavad Gītā and Śaṅkara's Commentary*

**(i)** योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम्॥

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्॥

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥

कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावकम्॥

*Chap. 6, vv 33 to 35; Chap. 18, vv 42 to 44*

**(a)** Translate lines 1 to 4, *'yo'yam . . . suduṣkaram'*. [4]

**(b)** Translate and describe grammatically:
**(i)** *'kṛṣigaurakṣyavāṇijyam'* (line 11)
**(ii)** *'svabhāvajam'* (lines 8,10,11 and 12) [3]

**(c)** Explain how the qualities of the *kṣatriya* as shown in the above verses are suited to the function of the *kṣatriya* in society. [3]

**(ii)** अशोच्यानन्वशोचस्त्वं प्राज्ञवादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः॥

अशोच्यानित्यादि॥ न शोच्या अशोच्या भीष्मद्रोणादयः सद्‌वृत्तत्वात्परमार्थरूपेण च नित्यत्वात्, तानशोच्यानन्वशोचोऽनुशोचितवानसि ते म्रियन्ते मन्निमित्तमहं तैर्विनाभूतः किं करिष्यामि राज्यसुखादिनेति। त्वं प्राज्ञवादान् प्रज्ञावतां बुद्धिमतां वादांश्च वचनानि च भाषसे। तदेतन्मौढ्यं पाण्डित्यं च विरुद्धमात्मनि दर्शयस्युन्मत्त इवेत्यभिप्रायः। यस्माद्गतासून्गतप्राणान्मृतान्, अगतासूनगतप्राणाञ्जीवतश्च नानुशोचन्ति पण्डिता आत्मज्ञाः। पण्डा आत्मविषया बुद्धिर्येषां ते हि पण्डिताः 'पाण्डित्यं निर्विद्य' इति श्रुतेः। परमार्थतस्तु नित्यानशोच्याननुशोचस्यतो मूढोऽसीत्यभिप्रायः॥

*Śaṅkarabhāṣya* on *Bhagavad Gītā,* Chap. 2, v 11

**(a)** Translate lines 3 to 6, *'na socyāḥ . . . rājyasukhādineti'.* [5]

**(b)** Summarise what Śaṅkara says about the meaning of the word *'paṇḍitāḥ'* (lines 9 to 11)? [2]

**(c)** Name three methods that Śaṅkara utilizes to explain the meaning of the verses of the *Bhagavad Gītā.* Illustrate two of them from this passage. [3]

[Total: 10 x 2 = 20 marks]

END